॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ५७

प्रतिबुद्धो मुहुर्तेन शोकोपहतचेतनः ।
अथ राजा दशरथः स चिन्ताम् अभ्यपद्यत ॥ १॥

रामलक्ष्मणयोश्चैव विवासाद्वासवोपमम् ।
आविवेशोपसर्गस्तं तमः सूर्यमिवासुरम् ॥ २॥

स राजा रजनीं षष्ठीं रामे प्रव्रजिते वनम् ।
अर्धरात्रे दशरथः संस्मरन्दुष्कृतं कृतम् ।
कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ३॥

यदाचरति कल्याणि शुभं वा यदि वाशुभम् ।
तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥ ४॥

गुरु लाघवमर्थानामारम्भे कर्मणां फलम् ।
दोषं वा यो न जानाति स बाल इति होच्यते ॥ ५॥

कश्चिदाम्रवणं छित्त्वा पलाशांश्च निषिञ्चति ।
पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ॥ ६॥

सोऽहमाम्रवणं छित्त्वा पलाशांश्च न्यषेचयम् ।
रामं फलागमे त्यक्त्वा पश्चाच्छोचामि दुर्मतिः ॥ ७॥

लब्धशब्देन कौसल्ये कुमारेण धनुष्मता ।
कुमारः शब्दवेधीति मया पापमिदं कृतम् ।
तदिदं मेऽनुसम्प्राप्तं देवि दुःखं स्वयं कृतम् ॥ ८॥

संमोहादिह बालेन यथा स्याद्भक्षितं विषम् ।
एवं ममाप्यविज्ञातं शब्दवेध्यमयं फलम् ॥ ९॥

देव्यनूढा त्वमभवो युवराजो भवाम्यहम् ।
ततः प्रावृडनुप्राप्ता मदकामविवर्धिनी ॥ १०॥

उपास्यहि रसान्भौमांस्तत्वा च जगदंशुभिः ।
परेताचरितां भीमां रविराविशते दिशम् ॥ ११॥

उष्णमन्तर्दधे सद्यः स्निग्धा ददृशिरे घनाः ।
ततो जहृषिरे सर्वे भेकसारङ्गबर्हिणः ॥ १२॥

पतितेनाम्भसा छन्नः पतमानेन चासकृत् ।
आबभौ मत्तसारङ्गस्तोयराशिरिवाचलः ॥ १३॥

तस्मिन्नतिसुखे काले धनुष्मानिषुमान्रथी ।
व्यायाम कृतसङ्कल्पः सरयूमन्वगां नदीम् ॥ १४॥

निपाने महिषं रात्रौ गजं वाभ्यागतं नदीम् ।
अन्यं वा श्वापदं कं चिज्जिघांसुरजितेन्द्रियः ॥ १५॥

अथान्धकारे त्वश्रौषं जले कुम्भस्य पर्यतः ।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥ १६॥

ततोऽहं शरमुद्धृत्य दीप्तमाशीविषोपमम् ।
अमुञ्चं निशितं बाणमहमाशीविषोपमम् ॥ १७॥

तत्र वागुषसि व्यक्ता प्रादुरासीद्वनौकसः ।
हा हेति पततस्तोये वागभूत्तत्र मानुषी ।
कथमस्मद्विधे शस्त्रं निपतेत्तु तपस्विनि ॥ १८॥

प्रविविक्तां नदीं रात्रावुदाहारोऽहमागतः ।
इषुणाभिहतः केन कस्य वा किं कृतं मया ॥ १९॥

ऋषेर्हि न्यस्त दण्डस्य वने वन्येन जीवतः ।
कथं नु शस्त्रेण वधो मद्विधस्य विधीयते ॥ २०॥

जटाभारधरस्यैव वल्कलाजिनवाससः ।
को वधेन ममार्थी स्यात्किं वास्यापकृतं मया ॥ २१॥

एवं निष्फलमारब्धं केवलानर्थसंहितम् ।
न कश्चित्साधु मन्येत यथैव गुरुतल्पगम् ॥ २२॥

नेमं तथानुशोचामि जीवितक्षयमात्मनः ।
मातरं पितरं चोभावनुशोचामि मद्विधे ॥ २३॥

तदेतान्मिथुनं वृद्धं चिरकालभृतं मया ।
मयि पञ्चत्वमापन्ने कां वृत्तिं वर्तयिष्यति ॥ २४॥

वृद्धौ च मातापितरावहं चैकेषुणा हतः ।

केन स्म निहताः सर्वे सुबालेनाकृतात्मना ॥ २५ ॥

तं गिरं करुणां श्रुत्वा मम धर्मानुकाङ्क्षिणः ।
कराभ्यां सशरं चापं व्यथितस्यापतद्भुवि ॥ २६ ॥

तं देशमहमागम्य दीनसत्त्वः सुदुर्मनाः ।
अपश्यमिषुणा तीरे सरय्वास्तापसं हतम् ॥ २७ ॥

स मामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थचेतसं ।
इत्युवाच वचः क्रूरं दिधक्षन्निव तेजसा ॥ २८ ॥

किं तवापकृतं राजन्वने निवसता मया ।
जिह्मीर्षिउरम्भो गुर्वर्थ म् यदह म् ता दितस्त्वया ॥ २९ ॥

एकेन खलु बाणेन मर्मण्यभिहते मयि ।
द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे ॥ ३० ॥

तौ नूनं दुर्बलावन्धौ मत्प्रतीक्षौ पिपासितौ ।
चिरमाशाकृतां तृष्णां कष्टां सन्धारयिष्यतः ॥ ३१ ॥

न नूनं तपसो वास्ति फलयोगः श्रुतस्य वा ।
पिता यन्मां न जानाति शयानं पतितं भुवि ॥ ३२ ॥

जानन्नपि च किं कुर्यादशक्तिरपरिक्रमः ।
भिद्यमानमिवाशक्तस्त्रातुमन्यो नगो नगम् ॥ ३३ ॥

पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव ।
न त्वामनुदहेत्क्रुद्धो वनं वह्निरिवैधितः ॥ ३४ ॥

इयमेकपदी राजन्यतो मे पितुराश्रमः ।
तं प्रसादय गत्वा त्वं न त्वां स कुपितः शपेत् ॥ ३५ ॥

विशल्यं कुरु मां राजन्मर्म मे निशितः शरः ।
रुणद्धि मृदु सोत्सेधं तीरमम्बुरयो यथा ॥ ३६ ॥

न द्विजातिरहं राजन्मा भूत्ते मनसो व्यथा ।
शूद्रायामस्मि वैश्येन जातो जनपदाधिप ॥ ३७ ॥

इतीव वदतः कृच्छ्राद्बाणाभिहतमर्मणः ।
तस्य त्वानम्यमानस्य तं बाणमहमुद्धरम् ॥ ३८ ॥

जलार्द्रगात्रं तु विलप्य कृच्छ्रान्
मर्मव्रणं सन्ततमुच्छ्वसन्तम् ।
ततः सरय्वां तमहं शयानं
समीक्ष्य भद्रे सुभृशं विषण्णः ॥ ३९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com